सप्तमीं शृणु। यामुपोष्य समाप्नोति सर्वान् कामान् धराधर!। पाषण्डादिभिरालापमकुर्वन् भानुतत्परः। पूजयेत् प्रणतो देवमेकाग्रमतिरंशुपम्। माघादि पारणं मासैः षड्भिः शुच्यन्तकं स्मृतम्”। शुच्यन्तकम् आषाढान्तकम्। “मार्त्तण्डः प्रथमं नाम द्वितीयोऽर्कः प्रकीर्त्तितः। तृतीयं चित्रभानुस्तु विभावसुरतःपरम्। भगेति पञ्चमो ज्ञेयः षष्ठो हंसः प्रकीर्त्तितः। पूर्वेषु षट्सु मासेषु स्नानप्राशनयोस्तिलाः। श्रावणादिषु मासेषु पञ्चगव्यमुदाहृतम्। स्नाने च प्राशने चैव प्रशस्तं पापनाशनम्। प्रतिमासन्तु देवस्य कृत्वा पूजां यथाविधि। विप्राय दक्षिणां दद्यात् श्रद्दधानः स्वशक्तितः। पारणान्ते च देवस्य प्रीणनं भक्तिपूर्वकम्। कुर्वीत शक्त्या विधिवद्रविं भक्त्या दिवस्पतिम्”।

सर्वाप्तिव्रतं विष्णुधर्मोत्तरोक्तम् “इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव। बलं ज्ञानं तथैश्वर्यं शक्तिश्च यदुनन्दन!। विख्यातं देवदेवस्य तस्य मूर्त्तिचतुष्टयम्। यदेव रूपं कूर्मस्य बलस्योक्तं तथैव तु। रूपं ज्ञानस्य ते प्रोक्तं नारसिंहं तथा नृप!। रुद्ररूपं तथैश्वर्यं कथितन्तु मया तव। पूर्वं बलमुखं तस्य वासुदेवमुखं भवेत्। दक्षिणं वदनं ज्ञानं देवं सङ्कर्षणं विदुः। ऐश्वर्यं पश्चिमं वक्त्रं रौद्रं पापहरं तथा। वाराहञ्च तथा वक्त्रमनिरुद्धं प्रकीर्त्तितम्। त्रिरात्रोपोषितस्त्वेवं पूर्वं संपूजयेन्मुखम् शुक्लपक्षप्रतिपदि वैशाखे मासि दक्षिणम्। ज्यैष्ठे च पश्चिमं वक्त्रमाषाढ़े च तथोत्तरम्। गृहोपयोगि दातव्यं चैत्रे मासे द्विजातये। रणोपयोगि दातव्यं वैशाखे यादवोत्तम!। योगोपयोगि दातव्यं ज्यैष्ठे मासि द्विजातये। यज्ञोपयोगि दातव्यं मास्याषाढ़े तथैव च। व्रतमेतन्नरः कृत्वा पूर्णमासचतुष्टयम्। पारणं प्रथमं कृत्वा स्वर्गलोके महीयते। श्रावणादिषु मासेषु द्वितीयं पारणं भवेत्। दशवर्षसहस्राणि स्वर्गं भुक्त्वा यथोदितम्। सौभाग्यादिषु भोगेषु तृतीयं पारणं भवेत्। तृतीयं पारणं कृत्वा भोजयेद्ब्राह्मणाञ्छुचिः। भोजनं गोरसप्रायं कदलीकाशर्करायुतम्। प्राप्ते द्वितीये व्रतपारणे तु प्राप्नोति देवस्य सलोकतां सः। स्वर्गेन्द्रलोके च यथोक्तकालं भुङ्क्ते सुखं सर्वसमृद्धिकामः”।

सर्षपसप्तमीव्रतं भविष्यपु० “संपूज्य विधिवद्देवं पुष्पधूपादिभिर्बुधः। यथाशक्ति ततः पश्चान्नैवेद्यं भक्तितो न्यसेत्। सुमनसां प्रवरा जातिर्धूपानां विजयः परः। गन्धानां कुङ्कुमं श्रेष्ठं लेपानां रक्तचन्दनम्। दीपदाने घृतं श्रेष्ठं नैवेद्यं मोदकं परम्। एतैस्तुष्यति देवेशः सान्निध्यं चापि गच्छति। एवं संपूज्य विधिवत् कृत्वा चापि प्रदक्षिणम्। प्रणम्य शिरसा देव! देवदेवं दिवाकरम्। सुखासीनस्ततः पश्चाद्रवेरभिमुखस्थितः। एवं सिद्धार्थकं कृत्वा हस्ते पानीयसंयुतः”। सिद्धार्थकं पश्येदित्यन्वयः “कामं यथेष्टं हृदये कृत्वा तं वाञ्छितं नरः। पिबेत् सन्तोषयन् विप्रमस्पृशन् दशनैः सकृत्”। रात्राविति शेषः “द्वितीयायान्तु सप्तम्यां द्वौ गृहीत्वा तु सुव्रत!। तृतीयायां तु सप्तम्यां पातव्यास्त्रय एव हि। चतुर्थ्यां वापि चत्वारः पञ्चम्यां पञ्च एव च। षट् पिवेच्चापि षष्ठ्यां तु इतीयं वैदिकी श्रुतिः। सप्तम्यां वारिसंयुक्तां सप्त चैव पिबेन्नरः”। वारिशब्दः द्रववाची पञ्चगव्यस्य वक्ष्यमाणत्वात् “उदकप्रभृतिं यावत् पञ्चगव्येन सप्तमी। एकं तोयेन सहितं द्वौ वापि घृतसंयुतौ। तृतीयं मधुना सार्द्धं दध्नापि च चतुष्टयम्। युक्तास्तु पयसा पञ्च षट् च गोमयसंयुताः। पञ्चगव्येन वै सप्त पिबेत् सिद्धार्थकान् द्विज!। अनेन विधिना यस्तु कुर्य्यात् सर्षपसप्तमीम्। बहुपुत्रो बहुधनः सिद्धार्थश्चापि सर्वदा। इह लोके नरो भूत्वा प्रेत्य याति विभावसुम्”।

सागरव्रतं विष्णुधर्मोत्तरोक्तम् “इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव। नित्यञ्चतुर्षु मासेषु श्रावणाद्येषु यादव!। चतुःसागरचिह्नानि पूर्णकुम्भांस्तु पूजयेत्। चतुरात्मा हरिर्ज्ञेयः सागरात्मा विचक्षणैः। स्नानं समाचरेन्नित्यं नदीतोयेन यादव!। होमञ्च प्रत्यहं कुर्य्यात् सततं तैलवर्जितम्। कार्त्तिकस्यावसानाच्च पूजयित्वा द्विजोत्तमान्। तैलं दत्त्वा तु विप्राय नाकपृष्ठे महीयते। सर्वकामसमृद्धस्य यज्ञस्य लभते फलम्”।

साध्यव्रतं विष्णुधर्मोत्तरोक्तम् “मनोमनस्तथा प्राणो नरो जातश्च वीर्य्यवान्। वीतिर्हयोऽनघश्चैव हंसो नारायणस्तथा। विभुश्चापि प्रभुश्चैव साध्या द्वादश कीर्त्तिताः। पूजयेच्छुक्लपक्षे तान् द्वादश्यां मार्गशीर्षतः। कृत्वा व्रतं वत्सरमेतदिष्टं प्राप्नोति तेषां तु स सलोकमेव। तत्रोष्य कालं सुचिरं मनुष्यो राजा भवेद् द्विजपुङ्गवो वा”।

सामव्रतं पद्मपु० “घृतेन स्नापनं कृत्वा केशवस्य शिवस्य च। ब्रह्मणो भास्करस्यापि गौर्य्या लम्बोदरस्य च। अक्षतैस्तु शुभं कुर्य्यात् पद्मं गोमयमण्डले। समान्ते हेमकमलं तिलधेनुसमन्वितम्”। समा वर्षम्। “शुक्लपक्षा-